२७९

मार्कण्डेय उवाच

अथ कन्याप्रदाने स तमेवार्थं विचिन्तयन् ।

समानिन्ये च तत्सर्वं भाण्डं वैवाहिकं नृपः ॥१॥

ततो वृद्धान्द्विजान्सर्वानृत्विजः सपुरोहितान् ।

समाहूय तिथौ पुण्ये प्रययौ सह कन्यया ॥२॥

मेध्यारण्यं स गत्वा च द्युमत्सेनाश्रमं नृपः ।

पद्भ्यामेव द्विजैः सार्धं राजर्षिं तमुपागमत् ॥३॥

तत्रापश्यन्महाभागं शालवृक्षमुपाश्रितम् ।

कौश्यां बृस्यां समासीनं चक्षुर्हीनं नृपं तदा ॥४॥

स राजा तस्य राजर्षेः कृत्वा पूजां यथार्हतः ।

वाचा सुनियतो भूत्वा चकारात्मनिवेदनम् ॥५॥

तस्यार्घ्यमासनं चैव गां चावेद्य स धर्मवित् ।

किमागमनमित्येवं राजा राजानमब्रवीत् ॥६॥

तस्य सर्वमभिप्रायमितिकर्थव्यतां च ताम् ।

सत्यवन्तं समुद्दिश्य सर्वमेव न्यवेदयत् ॥७॥

अश्वपतिरुवाच

सावित्री नाम राजर्षे कन्येयं मम शोभना ।

तां स्वधर्मेण धर्मज्ञ स्नुषार्थे त्वं गृहाण मे ॥८॥

द्युमत्सेन उवाच

च्युताः स्म राज्याद्वनवासमाश्रिताश्

चराम धर्मं नियतास्तपस्विनः ।

कथं त्वनर्हा वनवासमाश्रमे

सहिष्यते क्लेशमिमं सुता तव ॥९॥

अश्वपतिरुवाच

सुखं च दुःखं च भवाभवात्मकं

यदा विजानाति सुताहमेव च ।

न मद्विधे युज्यति वाक्यमीदृशं

विनिश्चयेनाभिगतोऽस्मि ते नृप ॥१०॥

आशां नार्हसि मे हन्तुं सौहृदात्प्रणयेन च ।

अभितश्चागतं प्रेम्णा प्रत्याख्यातुं न मार्हसि ॥११॥

अनुरूपो हि संयोगे त्वं ममाहं तवापि च ।

स्नुषां प्रतीच्छ मे कन्यां भार्यां सत्यवतः सुताम् ॥१२॥

द्युमत्सेन उवाच

पूर्वमेवाभिलषितः सम्बन्धो मे त्वया सह ।

भ्रष्टराज्यस्त्वहमिति तत एतद्विचारितम् ॥१३॥

अभिप्रायस्त्वयं यो मे पूर्वमेवाभिकाङ्क्षितः ।

स निर्वर्ततु मेऽद्यैव काङ्क्षितो ह्यसि मेऽतिथिः ॥१४॥

मार्कण्डेय उवाच

ततः सर्वान्समानीय द्विजानाश्रमवासिनः ।
यथाविधि समुद्वाहं कारयामासतुर्नृपौ ।।१५।।
दत्त्वा त्वश्वपतिः कन्यां यथार्हं च परिच्छदम् ।
ययौ स्वमेव भवनं युक्तः परमया मुदा ।।१६।।
सत्यवानपि भार्यां तां लब्ध्वा सर्वगुणान्विताम् ।
मुमुदे सा च तं लब्ध्वा भर्तारं मनसेप्सितम् ।।१७।।
गते पितरि सर्वाणि संन्यस्याभरणानि सा ।
जगृहे वल्कलान्येव वस्त्रं काषायमेव च ।।१८।।
परिचारैर्गुणैश्चैव प्रश्रयेण दमेन च ।
सर्वकामक्रियाभिश्च सर्वेषां तुष्टिमावहत् ।।१९।।
श्वश्रूं शरीरसत्कारैः सर्वैराच्छादनादिभिः ।
श्वशुरं देवकार्यैश्च वाचः संयमनेन च ।।२०।।
तथैव प्रियवादेन नैपुणेन शमेन च ।
रहो चैवोपचारेण भर्तारं पर्यतोषयत् ।।२१।।
एवं तत्राश्रमे तेषां तदा निवसतां सताम् ।
कालस्तपस्यतां कश्चिदतिचक्रामभारत ।।२२।।
सावित्र्यास्तु शयानायास्तिष्ठन्त्याश्च दिवानिशम् ।
नारदेन यदुक्तं तद्वाक्यं मनसि वर्धते ।।२३।।